# श्रीमद् भागवत रसिक कुटुंब

## श्रीतुलसीस्तोत्रम्

जगद्धात्रि! नमस्तुभ्यं(वँ) विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः(स्) सृष्टि स्थित्यन्तकारिणः ॥ 1॥

नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः(स्) सम्पत्प्रदायिके ॥ 2॥

तुलसी पातु मां(न्) नित्यं(म्) सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ 3॥

नमामि शिरसा देवीं(न्) तुलसीं(वँ) विलसत्तनुम् ।
यां(न्) दृष्ट्वा पापिनो मर्त्या मुच्यन्ते सर्वकिल्बिषात् ॥ 4॥

तुलस्या रक्षितं(म्) सर्वं(ञ्) जगदेतच्चराचरम् ।
या विनिहन्ति पापानि दृष्ट्वा वा पापिभिर्नरैः ॥ 5॥

नमस्तुलस्यतितरां(यँ) यस्यै बद्धाञ्जलिं(ङ्) कलौ ।
कलयन्ति सुखं(म्) सर्वं(म्) स्त्रियो वैश्यास्तथाऽपरे ॥ 6॥

तुलस्या नापरं(ङ्) किञ्चिद्दैवतं(ञ्) जगतीतले ।
यथा पवित्रितो लोको विष्णुसङ्गेन वैष्णवः ॥ 7॥

तुलस्याः(फ्) पल्लवं(वँ) विष्णोः(श्) शिरस्यारोपितं(ङ्) कलौ ।
आरोपयति सर्वाणि श्रेयां(म्)सि वरमस्तके ॥ 8॥

तुलस्यां(म्) सकला देवा वसन्ति सततं(यँ) यतः ।
अतस्तामर्चयेल्लोके सर्वान् देवान् समर्चयन् ॥ 9॥

नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे ।
पाहि मां(म्) सर्व पापेभ्यः(स्) सर्वसम्पत्प्रदायिके ॥ 10॥

इति स्तोत्रं(म्) पुरा गीतं(म्) पुण्डरीकेण धीमता ।
विष्णुमर्चयता नित्यं(म्) शोभनैस्तुलसीदलैः ॥ 11॥

तुलसी श्रीर्महालक्ष्मीर्विद्याविद्या यशस्विनी ।
धर्म्या धर्मानना देवी देवीदेवमनः(फ्)प्रिया ॥ 12॥

लक्ष्मीप्रियसखी देवी द्यौर्भूमिरचला चला ।
षोडशैतानि नामानि तुलस्याः(ख्) कीर्तयन्नरः ॥ 13॥

लभते सुतरां(म्) भक्तिमन्ते विष्णुपदं(लँ) लभेत् ।
तुलसी भूर्महालक्ष्मीः(फ्) पद्मिनी श्रीर्हरिप्रिया ॥ 14॥

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायणमनः(फ्)प्रिये ॥ 15॥

इति श्रीपुण्डरीककृतं(न्) तुलसीस्तोत्रं(म्) सम्पूर्णम् ॥